# रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालये सरस्वतीपूजा

विष्णुपदपालः

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥

हिन्दुसम्प्रदाये ज्ञानस्य सङ्गीतकलायाश्च अधिष्ठात्री देवी सरस्वती। सर्वत्र क्षेत्रे अस्माभिः देवाः स्तूयन्ते इत्ययमेव हिन्दुसम्प्रदायः। भारतस्य गृहे गृहे इयं पूजा भवत्येव। यद्यपि इयं पूजा प्रतिदिनं भवति तथापि वङ्गेषु महासरस्वतीदेव्याः विशिष्टतया आराधना माघमासस्य शुक्लपक्षस्य पञ्चम्यां तिथौ क्रियते। प्राचीनकाले बहवः कवयः पण्डिताश्च सरस्वतीमातुः आराधनां कृत्वैव विशिष्टविद्यां प्राप्य सहृदयानां हृदये चिराय स्थानमलभन्त। एवमेव बहवः सङ्गीतज्ञा अपि देव्या आराधनां विधायैव विशिष्टकलां प्राप्य यशसा गीतजगति विराजन्ते। सरस्वत्याः नामान्तरं भवति वाणी, ब्राह्मी, वाग् इति। देवीयं सत्त्वगुणा वर्तते। अत एव ज्ञानस्य कलायाः इत्यादीनां देवी।

आदिशक्ते रूपत्रयमस्ति। महालक्ष्मीः, महाकाली, महासरस्वती चेति। देवीभागवतानुसारेण आदिशक्तेः तृतीयांशतः सरस्वतीदेव्याः जन्म। एवञ्च सा देवी भगवतः कृष्णस्य जिह्वात उत्पन्ना। महाकालीदेव्याः पूजा चैत्रे अश्विने वा मासे शुक्लपक्षस्य नवम्यां तिथौ क्रियते। महालक्ष्मीदेव्याः पूजा कार्तिकमासस्य अमावस्यातिथौ क्रियते। एवञ्च महासरस्वतीदेव्याः पूजा माघमासस्य शुक्लपक्षस्य पञ्चम्यां तिथौ भवति। अद्वैतिनां मोक्षः एव परमप्राप्तिः। तत्रापि ज्ञानेनैव मुक्तिः इति तु सर्वजनविदितमेव। ज्ञानाभावाज् जगदिदमन्धकारमयं स्यात्।

एतादृशमाहात्म्यविशिष्टज्ञानस्य अधिष्ठात्री देवी सरस्वती माता। अतः तस्याः पूजाया अपि माहात्म्यम् अतुलनीयमस्ति। प्रथमतया ब्रह्मा सरस्वतीं पूजयामास। पुनश्च जगति तत्पूजायाः प्रचारः कृष्णेनैव कृतः। विद्यालये, विश्वविद्यालये, गृहे गृहे सर्वत्र प्रायः देव्याः पूजा भवत्येव।

बाल्यकालतः छात्राः विद्याप्राप्तये आनन्दलाभाय च वरिष्ठानां सकाशात् किञ्चिद् धनं स्वीकृत्य लघुमण्डपे पूजा प्रारभ्यन्ते। एवञ्च तद्दिने सर्वत्र मातुः आराधनायां रताः मानवाः। शिक्षाप्रतिष्ठानादिषु शिक्षकादिभिः समं छात्राः पूजामायोजयन्ति। पुनश्च तद्दिने सर्वकारीयविराममाप्य दैवकार्ये सम्पूर्णमात्मानं नियोजयति। प्रायः लघवः शिशवः एकमासात्प्राक् एव पूजार्थं सन्निग्धाः भवन्ति। ग्रामादिषु बालाः स्वमातुः शाटिकया ज्ञानदेव्या वासगृहं निर्मान्ति। पूजादिवसात् प्राक्तनदिने प्रतिमानयनं, मण्डपसज्जा, फलादिक्रयणम् इत्यादीनि पूजासम्बन्धिकार्याणि क्रियन्ते। अत्रापि प्रायः बालाः रात्रिकाले निद्रातः उत्थाय पुष्पाणि सङ्गृह्णन्ति। प्रातः काले शैत्यवशात् स्नातुमनिच्छन्तोऽपि ज्ञानप्राप्त्याशया विधिवत् कार्यं कुर्वन्ति। ततः परं निर्मलवस्त्रं परिधाय शुद्धमनसा पूजामण्डपं यान्ति। ततः पर प्रेम्ना भक्त्या सश्रद्धया च वाग्देव्याः ज्ञानदायिन्याः सकाशे पुष्पाञ्जलिः प्रदीयते।

सरस्वती महाभागे विद्ये कमललोचने
विश्वरुपे विशालाक्षि विद्यां देहि नमोस्तु ते।
जय जय देवि चराचरसारे कुचयुगशोभितमुक्ताहारे
वीणारञ्जितपुस्तकहस्ते भगवति भारति देवि नमोस्तु ते॥ इति

एतन्मन्त्रेण ज्ञानदायिनीं ज्ञानं प्रार्थयन्ते जनाः। एतत्पवित्रदिने पितृतर्पणमपि प्रदीयते। अस्मिन् दिने लघुबालानां अक्षरारम्भः कार्यते। नववस्त्रसज्जिताः बालाः देव्याः पुरस्तात् प्रस्तरपट्टे प्रथमम् अक्षरं लिखन्ति इति प्रायः सर्वत्र पूजामण्डपेषु एतादृशं चित्रं दरीदृश्यते एव।

अस्मद्विश्वविद्यालये विशुद्धसिद्धान्तपञ्जिकानुसारेण पूजातिथिः निर्धार्यते। अस्माकं विश्वविद्यालयस्य छात्रावासे स्थितानां छात्राणां कृते कार्यसूची प्रदीयते। केषाञ्चित् भाजनक्षालनं , केषाञ्चित् फलशोधनं ,केषाञ्चित् मूर्त्यानयनं, केषाञ्चित् पुष्पसञ्चयनम् इत्यादीनि कार्याणि भवन्ति। ततः परं सर्वे छात्राः धौतवस्त्रं परिधाय पूजामण्डपे उपस्थिताः भवन्ति। ततः परं पूजाकार्यं प्रारभ्यते।

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरं शुचिः॥ इति

मन्त्रेण पूजामारभ्य क्रमशः पुण्यहवाचनं, स्वस्तिवाचनं, साक्ष्यमन्त्रः, सङ्कल्पः, पञ्तगव्यशोधनं , वेदिशोधनम् , घटस्थापनं , द्वारदेवतापूजा, भूतापसारणम् इत्यादीनि कार्याणि विधिवत् क्रमानुसारेण आचर्यते। ततः परं श्रीगुरुपूजा, श्रीगणेशपूजा, शिवपूजा, सूर्यपूजा, नारायणपूजा इत्यादिपूजाः क्रियन्ते सरस्वतीपूजायाः प्राक् एव। सरस्वतीदेव्याः आवाहनमन्त्रो भवति तावत्–

भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च॥ इति

अन्ते सर्वे पुष्पाञ्जलिं प्रदाय अतिथिभ्यः प्रसादादिकं ददति स्वयं च मातुः प्रसादं सेवन्ते।

ततः परस्मिन् दिने प्रतिमाविसर्जनाय गङ्गां प्रति यान्ति। ततः मण्डपमागत्य देव्याः भजनं कुर्वन्ति। प्रतिमां विसृज्य एव आगामिनि वत्सरे भविष्यमाणपूजार्थमपेक्षा प्रारभ्यते।

नमः सरस्वत्यै नमः



अस्मद्विश्वविद्यालये पूज्यमाना देवीप्रतिमा